श्रीरामदण्डकम्

श्रीरामध्यानम् ।
हत्वा युद्धे दशास्यं त्रिभुवनविषमं वामहस्तेन चापं
भूमौ विष्टभ्य तिष्ठन्नितरकरधृतं भ्रामयन्बाणमेकम् ।
आरक्तोपान्तनेत्रः शरदलितवपुः कोटिसूर्यप्रकाशो
वीरश्रीबन्धुराङ्गस्त्रिदशपतिनुतः पातु मां वीररामः ॥

अथ श्रीरामदण्डकं स्तोत्रम् ।
ॐ श्रीरामपरब्रह्मणे नमः ।

श्रीमदखिलाण्डकोटिब्रह्माण्डभाण्डदण्डोपदण्डकरण्डमलाशान्तोद्दी
पितसगुणनिर्गुणातीतसच्चिदानन्दपरात्परतारकब्रह्माह्वयदशदिक्
प्रकाशं, सकलचराचराधीशम् ॥ १ ॥

कमलसम्भवशचीधवप्रमुखनिखिलवृन्दारकवृन्द
वन्द्यमानसन्दीप्तदिव्यचारणारविन्दं, श्रीमुकुन्दम् ॥ २ ॥

दुष्टनिग्रहशिष्टपरिपालनोत्कट
कपटनाटकसूत्रचरित्रारञ्जितबहुविधावतारं, श्रीरघुवीरम् ॥ ३ ॥

कौसल्यादाशरथमनोरथामन्दानन्दकन्दलिताधिरूढक्रीडाविलोलन शैशवं श्रीकेशवम् ॥ ४ ॥

विश्वामित्रयज्ञविघ्नकारणोत्कटताटकासुवाहुबाहुबलविदलनबाणप्रवीणकोपपरायणं, श्रीमन्नारायणम् ॥ ५ ॥

निजपादजलजरजःकणस्पर्शनीयशिलारूपशापविमुक्तगौतमसतीविनुतमहीधवं, श्रीमाधवम् ! ॥ ६ ॥

खण्डेन्दुधरप्रचण्डकोदण्डखण्डनोद्दण्डदर्द्दण्डकौशिकलोचनोत्सव जनकचक्रेश्वरसमर्पितसीताविवाहोत्सवानन्दं, श्रीगोविन्दम् ॥ ७ ॥

परशुरामभूजाखर्वगर्वनिर्वापणपदानुगतरणविजयवर्तिष्णुं श्रीविष्णुम् ॥ ८ ॥

पितृवाक्यपरिपालनोत्कटजटावल्कलोद्यतसीतालक्ष्मणसहितमहित राज्याभिमतदृढव्रतसङ्कलितप्रयाणरङ्गगाङ्गावतरणसाधनं, श्रीमधुसूदनम् ॥ ९ ॥

भरद्वाजोपचारनिवारितश्रमक्रमनिराघाटचित्रकूटप्रवेशकक्रमं, श्रीत्रिविक्रमम् ॥ १० ॥

जनकवियोगशोकाकुलितभरतशत्रुघ्नलालनानुकूलभरतपादुकाप्रदानसुधानिर्मितान्तःकरणदुष्टचेष्टायमानक्रूरकाकासुरगर्वोपशमनं, श्रीवामनम् ॥ ११ ॥

दण्डकागमनविरोधक्रोधविराधानलज्वालाजलधरं श्रीधरम् ॥ १२ ॥

शरभङ्गसुतीक्ष्णात्रिदर्शनाशीर्वादनिर्व्याजकुम्भसम्भवकृपालब्धमहादिव्यास्त्रसमुदायार्जितप्रकाशं, श्रीहृषीकेशम् ॥ १३ ॥

पञ्चवटीतटीसङ्घटितविशालपर्णशालागतशूर्पणखानासिकाच्छेदनमानावबोधनमहाहवारम्भणविजृम्भणरावणनियोगमायामृगसंहारकार्यार्थलाभं, श्रीपद्मनाभम् ॥ १४ ॥

रात्रिञ्चरवरवञ्चनापहृतसीतान्वेषणरतपङ्क्तिकन्थरक्षोभशिथिलीकृतपक्षजटायुर्मोक्षबन्धुक्रियावसाननिर्बन्धनकबन्धवक्रोदरशरीरनिरादरं, श्रीमद्दामोदरम् ॥ १५ ॥

शबर्योपदेशपम्पातटहनुमत्सुग्रीवसम्भाषितबन्धुराद्वन्ददुन्दुभिकलेवरोत्पतनसप्तसालच्छेदनबालिविदारणप्रसन्नयुग्रीवसाम्राज्यसुखमर्षणं, श्रीसङ्कर्षणम् ॥ १६ ॥
सुग्रीवाङ्गदनीलजाम्बवत्पनसकेसरिप्रमुखनिखिलकपिनायकसेनासमुदायार्चितसेवं, श्रीवासुदेवम् ॥ १७ ॥

निजदत्तमुद्रिकाजाग्रत्समुग्राञ्जनेयविनयवचनरचनाम्बुधिलङ्घितल
ङ्किणीप्राणोल्लङ्घनजनकजादर्शनाक्षकुमारमारणलङ्कापुरीदहनतत्प्रति
ष्ठितसुखप्रसङ्गधृष्टद्युम्नं, श्रीप्रद्युम्नम् ॥ १८ ॥

अग्रजोदग्रमहोग्रनिग्रहपलायमानापमाननीयनिजशरण्यागण्यपुण्यो
दयविभीषणाभयप्रदानानिरुद्धं, श्रीमदनिरुद्धम् ॥ १९ ॥

अपारलवणपारावारसमुज्जृम्भितोत्करणगर्वनिर्वापणदीक्षासमर्थसेतु
निर्माणप्रवीणाखिलनरसुरोत्तमं, श्रीपुरुषोत्तमम् ॥ २० ॥

निस्तुलप्रहस्तकुम्भकर्णेन्द्रजित्कुम्भनिकुम्भाग्निवर्णातिकायमहोदरम
हापार्श्वादिदनुजतनुखण्डनायमानकोदण्डगुणश्रवणशोषणहतशेषरा
क्षसव्रजं, श्री अधोक्षजम् ॥ २१ ॥

अकुण्ठितरणोपकण्ठदशकण्ठदनुजकण्ठीरवकण्ठलुण्ठनायमानज
यार्हं, श्रीनारसिंहम् ॥ २२ ॥

दशग्रीवानुजपट्टभद्रत्वशक्यविभवलङ्कापुरीस्फुरणसकलसाम्राज्य-
सुखोर्जितं, श्रीमदच्युतम् ॥ २३ ॥

सकलसुरासुराद्भुतप्रज्वलितपावकमुखपूतायमानसीतालक्ष्मणानुग
तमहनीयपुष्पकाधिरोहणनन्दिग्रामस्थितभ्रातृभिर्युतजटावल्कलवि
सर्जनाम्बरभूषणालङ्कृतश्रेयोविवर्धनं, श्रीजनार्द्दनम् ॥ २४ ॥

अयोध्यानगरपट्टाभिषेकविशेषमहोत्सवनिरन्तरदिगन्तविश्रान्तहारहीरकर्पूरपयःपारावारापाराभवाणीकुन्देन्दुमन्दाकिनीचन्दनसुरधेनुशरदम्बुदालीशरदम्भोलीशतधाराधावल्यशुभकीर्त्तिच्छटान्तरपाण्डुरीभूतसभाविभ्राजमाननिखिलभुवनैकसान्द्रयशस्सान्द्रं, श्री उपेन्द्रम् ॥ २५ ॥

भक्तजनसंरक्षणदीक्षाकटाक्षसुखोदयसमुत्सारिं, श्रीहरिम् ॥ २६ ॥

केशवादिचतुर्विंशतिनामगर्भसन्दर्भोचितनिजकथाङ्गीकृतमेधावतिष्णं, श्रीकृष्णम् ॥ २७ ॥

सर्वसुपर्वपार्वतीहृदयकमलतारकब्रह्मनामं, श्रीसम्पूर्णकामम् ॥ २८ ॥

भवतरणानुयशस्सान्द्रं भवजनितभयोच्छेदविच्छात्रमच्छिद्रं भक्तजनमनोरथोन्निद्रं, श्रीभद्राचलरामभद्रम् ॥ २९ ॥

ॐ श्रीरामभद्राय नमः ।

इति श्रीरामदण्डकं समाप्तम् ।